ताड़ितः। इत्यजयपालः॥ (यथा, विष्णुसंहितायाम्। २०। ४४।
"नाकाले म्रियते कश्चित् विद्धः शरशतैरपि।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति॥")

विद्धकर्णः, पुं, (विद्धः कर्ण इव पत्रमस्य।) विद्धकर्णी। इति भरतद्विरूपकोषः॥ (विद्धौ कर्णौ यस्येति। छतकर्णवेधे, त्रि॥)

विद्धकर्णा, स्त्री, विद्धकर्णी। इति भरतद्विरूपकोषः॥

विद्धकर्णिका, स्त्री, (विद्धकर्णा। स्वार्थे कन्।) विद्धकर्णी। इति शब्दरत्नावली॥

विद्धकर्णी, स्त्री, (विद्धः कर्ण इव पत्रमस्याः।) वृक्षविशेषः। आकनादि इति भाषा॥ तत्पर्य्यायः। पाठा २ अम्बष्ठा ३ स्थापनी ४ श्रेयसी ५ रसा ६ एकाष्ठीला ७ पापचेली ८ प्राचीना ९ वनतिक्तिका १०। इत्यमरः॥ अविद्धकर्णी ११ अविद्धकर्णा १२। इति तट्टीका॥ आविद्धकर्णिका १३ विद्धकर्णिका १४। इति शब्दरत्नावली॥ अन्यत् पाठाशब्दे द्रष्टव्यम्॥

विद्यमानः, त्रि, (विद्+शानच्।) वर्त्तमानः। इति सच्छब्दटीकायां भरतः॥ (यथा, वैद्यके।
"वातायां विद्यमानायामाशायां जीवितस्य च॥")

विद्या, स्त्री, (विदन्त्यनया इति। विद्+"संज्ञायां समजनिषदनिपतेति।" ३।३।९९। इति क्यप्।) दुर्गा। इति शब्दरत्नावली॥ गणिकारिका। इति शब्दचन्द्रिका॥ ज्ञानम्। तत्तु मोक्षे धीः। इति जटाधरः॥ परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा। इति नागोजीभट्टः॥ मन्त्रः। यथा। शारदायाम्।
"भान्तं वियल्लनयनं श्वेतो महिंनि ठद्वयम्।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी॥"
विश्वसारे।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः।"
महिषमर्द्दिनीमन्त्रः॥
"दशाक्षरी समाख्याता विद्या त्रिभुवनेश्वरी।
प्रणवश्च तथा माया भवेद्विद्या पुनर्द्दश।
कामं प्रणवमित्युक्तं भवेद्विद्या पुनर्द्दश॥"
दुर्गामन्त्रः।
"वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी॥
तारमायादिका विद्या भोगमोक्षैकदायिनी।
यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्ककल्पना॥"
अन्नपूर्णामन्त्रः। इति तन्त्रसारः॥ * ॥ महाविद्या। कलौ तस्या नानाम्लेच्छशास्त्रमसी पूजा सर्व्वत्र भविता। अधुना वा वारोयारीपूजा इति ख्याता। यथा,—
"अस्मिन् काले सुरेशानि प्रकाशो जायते भुवि।
तमोधर्म्मेण सर्व्वत्र देवताप्रतिमां सदा॥
अष्टम्याञ्च चतुर्द्दश्यां नवम्यां शनिभौमयोः।
संक्रान्त्यां पञ्चदश्याञ्च पक्षयोरुभयोरपि॥
कृत्वा तु पूजयिष्यन्ति महाविद्यां सभैरवाम्।
विद्याञ्च विविधां देवि तथान्यप्रतिमां शुभाम्॥
एवं हि तामसीं पूजामनित्याञ्च भवेत् कलौ।"
इति मायातन्त्रे १७ पटलः॥

शास्त्रम्। तत्तु अष्टादशविधम्। यथा। शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ ऋग्वेदः ७ यजुर्व्वेदः ८ सामवेदः ९ अथर्व्ववेदः १० मीमांसा ११ न्यायः १२ धर्म्मशास्त्रम् १३ पुराणम् १४ आयुर्व्वेदः १५ धनुर्व्वेदः १६ गान्धर्व्ववेदः १७ अर्थशास्त्रम् १८॥ यथा, विष्णुपुराणम्।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः॥"
इति प्रायश्चित्ततत्त्वम्॥ * ॥

नीचादप्युत्तमा विद्या ग्राह्या यथा,—
"श्रद्दधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि॥"
इति मानवे २ अध्यायः॥ * ॥

विद्याप्रशंसा यथा,—
"ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था अधना अदाराः।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति॥
भोजने भोजनं चिन्तां न कुर्य्याच्छास्त्रसेवकः।
सुदूरमपि विद्यार्थी व्रजेत् गरुड़वेगवान्॥
ये बालभावान्न पठन्ति विद्यां
कामातुरा यौवननष्टचित्ताः।
ते वृद्धकाले परिभूयमानाः
सन्दह्यमानाः शिशिरे यथाब्जम्॥
माता शत्रुः पिता वैरी बालो येन न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥
विद्या नाम कुरूपरूपमधिकं प्रच्छन्नमन्तर्द्धनं
विद्या साधुजनप्रिया शुचिकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं देवता
विद्या भोग्ययशःकुलोन्नतिकरी विद्याविहीनः पशुः॥
गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते।
अशेषं हरणीयञ्च विद्या न ह्रियते परैः॥"
इति गारुड़े ११०।११५ अध्यायौ॥

अथ विद्यादानफलम्।
"यस्तु देया गृहे नित्यं विद्यादानं प्रवर्त्तयेत्।
स भवेत् सर्व्वलोकानां पूज्यः पूजापदं व्रजेत्॥
विद्यादानं प्रवक्ष्यामि येन तुष्यन्ति मातरः।
लिप्यते दीयते येन विधिना तं शृणुष्व नः॥
सिद्धान्तमोक्षशास्त्राणि वेदान् स्वर्गादिसाधकान्।
तदङ्गानीतिहासानि देया धर्म्मविवृद्धये॥
गारुड़ं वालतन्त्रञ्च भूततन्त्राणि भैरवम्।
शास्त्राणि पठनाद्दानात् मातरः फलदा नृणाम्॥
ज्योतिषं वैद्यशास्त्राणि कलाकाव्यं स्वभाग्यतः।
दानादारोग्यमाप्नोति गान्धर्व्वं लभते पदम्॥
विद्याभ्यो वर्त्तते लोको धर्म्माधर्म्मेषु वृद्धये।
तस्माद्विद्या सदा देया दृष्टादृष्टफलार्थिभिः॥
महीदानञ्च गोदानं हेमवस्त्रतिला जलम्।
धान्यदीपान्नदानञ्च महादानानि दानसु॥
इहान्न चीयते दानं दीपदानं नराधिप।
विद्या वृद्धिमवाप्नोति दीयमानापि नित्यशः॥
एकोच्चारेण भूदानं दत्तं भवति भूमिप।
नहि तद्विद्यते भूप देहपातादनन्तरम्॥
विद्यादानं न तद्वत्स एकधा दशधा भवेत्।
शतधा कोटिधा गच्छेदिहामुत्र च पारगः॥
राज्ञा तस्करदायाद्यैर्जलवह्निसरीसृपैः।
सर्व्वदानानि ह्रीयन्ते विद्या केनापि ह्रीयते॥
विद्यादानात् परं दानं न भूतं न भविष्यति।
विद्यादानेन दानानि नहि तुल्यानि बुद्धिमन्॥
विद्या एव परं मन्ये यत्तत् पदमनामयम्।
शृण्वन्नुत्पद्यते भक्तिर्भक्त्या गुरुमुपासते॥
स च विद्यागमान् वक्ति विद्या पुस्ताश्रिता नृप।
विद्याविवेकबोधेन शुभाशुभविचारिणाम्॥
विद्यते सर्व्वकामाप्तिस्तस्माद्विद्या परा मता॥
विद्यादानात् परं दानं न भूतं न भविष्यति।
येन दत्तेन चाप्नोति शिवं परमकारणम्॥
विद्याविचारतत्त्वज्ञा राज्ञः सन्मार्गगामिनः।
भुञ्जतेऽपि हि भोगानि गच्छन्ति परमां गतिम्॥
अन्त्यजा अपि यां प्राप्य क्रीड़न्ते शहराचरैः।
सा विद्या केन मीयेत यस्याः कोऽन्यः समोऽपि न॥
स्वरेण कुञ्जरं हन्ति सर्पेण तुरङ्गमम्।
मक्षिकापदमात्रस्य विषस्य विषमा गतिः॥
एवंविधं विधिं वत्स विद्यामन्त्रप्रभावतः।
जीर्य्यते भक्षितं पुंभिस्तस्माद्विद्या परात्परा॥
नहि विद्या कुलं जातिरूपं पौरुषपात्रताम्।
वशते सर्व्वलोकानां पठिता उपकारिका॥
भूतैर्गृहीता विध्वस्ता दष्टा वा महपन्नगैः।
विद्या उत्थापयेत् वत्स अन्त्यजस्यापि हृत्स्थिता।
सर्व्वेषामेव वृद्धानां विद्यावृद्धे हि मान्यता॥
वयोवृद्धो हि शूद्राणां विप्राणां धनवान् यतः।
क्षत्रियाणान्तु वीर्य्येण विप्राणां शास्त्रपारगः॥
वित्तं बन्धुर्वयश्चैव तपो विद्या यथोत्तरम्।
पूजनीयानि सर्व्वेषां विद्या तेषां गरीयसी॥
गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।
विद्यया लभ्यते विद्या चतुर्थी नोपलभ्यते॥
यः क्रतूनाशु महीं दद्यात् मेरुतुल्यञ्च काञ्चनम्।
स यदन्यायतः पृच्छेन्न तस्योपदिशेत् क्वचित्॥
एवंविधं महाभाग विद्यारूपं हि वर्णितम्।